# अष्टाध्याय्या: चतुर्थपादस्थानां पाणिनीयसंज्ञानां जैनेन्द्रव्याकरणस्थं स्वरूपम्

सम्भाजिः विठ्ठलः पाटीलः

**सारांशः -**

*इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।*
*इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥*[1]

अपवर्गप्राप्तये साधनभूतानां समेषां शास्त्राणामध्ययनाय द्वारभूतं भवतीदं व्याकरणशास्त्रम् वाक्यज्ञानं प्रति शब्दज्ञानस्य कारणत्वात् । शब्दं हि स एव बोद्धुं पारयति यश्च प्रकृति-प्रत्ययविभागपुरस्सरं तदर्थमपि ज्ञातुं पारयति । नावैय्याकरणः शक्नोति शब्दमर्थम् तयोः सम्बन्धं वा विज्ञातुम् । अत एवाचार्येण भर्तृहरिणा वाङ्मलनिवारकं शास्त्रमिदं सर्वविद्याप्रकाशकं पवित्रतमञ्चोच्यते । पाणिनिमन्तरापि कानिचन व्याकरणशास्त्राणीह प्रथितयशस्कान्यासन् । तत्रोच्यते

*इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।*
*पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ च शाब्दिकाः॥*

श्लोकेस्मिन्नष्टानां वैयाकरणानां नामानि दृश्यन्ते । तत्र वैयाकरणानां कोटिद्वयं दृश्यते । आचार्यपाणिनेः पूर्ववर्तिनः उत्तरवर्तिनश्चेति । इन्द्रः, काशकृत्स्नः, आपिशलिः, शाकटायनः इत्येते आचार्याः पाणिनेः पूर्ववर्तिनः, किञ्च अमरः, चन्द्रः, जैनेन्द्रश्चेत्येते आचार्याः पाणिन्युत्तरवर्तिनः । आचार्यदेवनन्देः अपरं नाम जिनेन्द्रः इत्यासीत् । तेन पाणिनीयव्याकरणमाधारीकृत्य नूतनं व्याकरणमरच्यत । अतो जैनेन्द्रं नाम जिनेन्द्रेण प्रोक्तमित्यपि उच्यते । तदपि पञ्चाङ्गं व्याकरणमासीत् । तस्मिन् आचार्यदेवनन्दिकृतजैनेन्द्रव्याकरणे याः पाणिनीयाधारितव्याकरणसंज्ञा: स्वीकृताः दृश्यन्ते, तासां स्वरूपविमर्शः अस्मिन् शोधपत्रे क्रियते ।

[1] वाक्यपदीयम्

**जैनेन्द्रं व्याकरणम् -**

अष्टसु व्याकरणेषु जैनेन्द्रं नाम जिनेन्द्रेण प्रोक्तमिति । वन्दनीयस्य आचार्यदेवनन्देः अपरं नाम जिनेन्द्रः इत्यासीत् । पञ्चमशताब्देः उत्तरार्धे संजातेनानेन आचार्येण पाणिनीयव्याकरणमाधारीकृत्य नूतनं व्याकरणमरच्यत । अष्टाध्याय्याः गभीरम् अध्ययनं कृत्वा पञ्चाध्याय्याः प्रणयनं तेनाक्रियत । जैनेन्द्रं पाणिनीयमिव पञ्चाङ्गं व्याकरणमासीत् । अष्टाध्यायी, वार्तिकग्रन्थः, महाभाष्यं च इत्येतेषां परमममर्ज्ञः आसीत् अयमाचार्यः। अत् एव तेन अष्टाध्याय्याः 'शब्दावतारन्यासः' इति न्यासग्रन्थः अरच्यत । स्वीयपञ्चाध्याय्याः अपि कश्चन न्यासः तेन विदुषा व्यरच्यत । तस्य पाण्डित्यस्य प्रत्ययः पदे पदे तद्ग्रन्थे दृश्यते। जैनेन्द्रसूत्रग्रन्थम् आधारीकृत्य आचार्येण अभयनन्दिनापि द्वादशसहस्रश्लोकात्मिका काचित् प्रामाणिकी महावृत्तिः व्यलिख्यत । एतद् जैनेद्रव्याकरणम् ऐतिहासिकदृष्ट्या अतीव प्रामाणिकं महत्त्वभूतं च वर्तते ।

**कूटशब्दाः -**

पाणिनीयं व्याकरणम् - जैनेन्द्रं व्याकरणम् - आचार्यः देवनन्दिः - घिनद्यादयः संज्ञाः- अपादानादयः संज्ञाः - निपातादयः संज्ञाः - परस्मैपदादयः संज्ञाः - एकवचनादयः संज्ञाः - उपसंहारः।

अष्टाध्याय्याः चतुर्थे पादे भगवता पाणिनिना २९ व्याकरणसंज्ञाः कथिताः सन्ति । यथा घिनद्यादयः । एतासां पाणिनीयव्याकरणस्थसंज्ञानां जैनेन्द्रव्याकरणे कीदृशं स्वरूपं वर्तते, कतरस्मिन् पक्षे लाघवं वर्तते, तच्च कीदृशमिति, व्याकरणद्वयस्य संज्ञानां साम्यं, वैषम्यं, तत्रत्यानि वैशिष्ट्यानि च इत्येतान् विषयान् आदाय शोधपत्रे ऽस्मिन् चर्चा क्रियते । अष्टाध्याय्याः सूत्रक्रमानुगुणमेव अत्र चतुर्थपादस्थाः २९ पाणिनीयसंज्ञाः पूर्वं प्रतिपाद्यन्ते ततः जैनेन्द्रसंज्ञाविमर्शः क्रियते ।

**१. नदी** - आचार्यपाणिनिना अष्टाध्याय्यामीदूदन्तानां नित्यस्त्रीलिङ्गकानां शब्दानां 'यूस्त्राख्यौ नदी'[2] इति सूत्रेण नदीसंज्ञा विधीयते । नदीसंज्ञायाः स्थाने आचार्यदेवनन्दिना 'य्वौ स्त्राख्यौ मुः'[3] इति सूत्रेण मुसंज्ञाकरणं कृतं वर्तते । मुसंज्ञेयं नदीसंज्ञापेक्षया लघ्वी ।

**२. घि** - नदीसंज्ञावर्जिताः किञ्च सखीशब्दं विहाय शेषाः ये इदन्ताः उदन्ताः शब्दाः तेषां घिसंज्ञाविधानं 'शेषो घ्यसखि'[4] इति सूत्रेण पाणिनीये शास्त्रे क्रियते । अस्याः पाणिनीयायाः घिसंज्ञायाः स्थाने जैनेन्द्रव्याकरणे 'स्वसखि'[5] इति सूत्रेण सुरिति संज्ञा विधीयते ।

३. **लघुः** - अष्टाध्यायां 'ह्रस्वं लघु'[6] इति सूत्रेणाचार्यपाणिनिना ह्रस्वस्याचः लघु संज्ञा उक्तास्ति । एतत्स्थाने 'प्रो घि च'[7] इति सूत्रेण जैनेन्द्रव्याकरणे एकमात्रिकस्य स्वरस्य तन्नाम ह्रस्वस्याचः घि इति संज्ञोच्यते ।

४. **गुरुः** - आचार्येण पाणिनिना संयोगे परतः ह्रस्वस्य अचः 'संयोगे गुरु'[8] इत्यनेन सूत्रेण किञ्च दीर्घस्य अक्षरस्य 'दीर्घं च'[9] इत्यनेन सूत्रेण गुरुसंज्ञा विधीयते । अस्याः गुरुसंज्ञायाः स्थाने आचार्येण देवनन्दिना 'स्फे रुः'[10] 'दीः'[11] इति सूत्रद्वयेन संज्ञा विधीयते । इयं जैनेन्द्रव्याकरणस्था रुरित्यपि संज्ञा पाणिनीयस्थगुरुसंज्ञायाः अपेक्षया लघ्वी वर्तते ।

---

2 अष्टा.१.४.३
3 जैनेन्द्र.१.२.९२
4 अष्टा.१.४.७
5 जैनेन्द्र.१.२.९७
6 अष्टा.१.४.१०
7 जैनेन्द्र.१.२.९९
8 अष्टा.१.४.११
9 अष्टा.१.४.१२
10 जैनेन्द्र.१.२.१००
11 जैनेन्द्र.१.२.१०१

५. **अङ्गम्** - अष्टाध्याय्यां पाणिनिना 'यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्'[12] इति सूत्रेण प्रत्ययः यस्माद्विधीयते तदादेः अङ्गसंज्ञा विहितास्ति । आचार्यदेवनन्दिना 'यत्ये तदादि गु:'[13] इति सूत्रेण गुरिति संज्ञा विहितास्ति । पाणिनीये येन सूत्रेण संज्ञा विहिता वर्तते तत्सूत्रपठनसमनन्तरमेव संज्ञाबोधो भवति किञ्च अङ्गसंज्ञायाः लोकेऽपि प्रसिद्धत्वात् अवगमनं सहजम् । जैनेन्द्रव्याकरणे गुसंज्ञाविधानं कृत्वा लाघवं तु साध्यत एव किन्तु संज्ञावबोधनाय व्याख्यानस्य अपेक्षा भवति । तस्माद्गौरवमापतति ।

**६. पदम्** - भगवता पाणिनिना सुबन्तानां तिङन्तानां च 'सुप्तिङन्तं पदम्'[14] इति सूत्रेण पदसंज्ञा विधीयते । आचार्येण देवनन्दिनापि पाणिनीयायाः पदसंज्ञायाः स्वीकारः स्वीये शास्त्रे कृतो दृश्यते । तेन 'सुम्मिन्तं पदम्'[15] इति सूत्रं प्रणीय सुबन्तानां मिङन्तानां च पदसंज्ञाविधानं जैनेन्द्रे कृतमवलोक्यते ।

**७. भम्** - आचार्यपाणिनिना यादिषु अजादिषु च कप्प्रत्ययावधिषु स्वादिषु असर्वनामस्थानेषु यत् पूर्वं तस्य 'यचि भम्'[16] इति सूत्रेण भसंज्ञा विधीयते । आचार्यदेवनन्दिना पाणिनीयभसंज्ञायाः स्वीकारस्तु कृतः किन्तु क्लीबे विद्यमानस्य भमिति पदस्य लिङ्गपरिवर्तनं कृत्वा तस्य पुंस्त्वं विहितं वर्तते । 'यचि भः'[17] इति सूत्रेण तेन भसंज्ञा उक्ता वर्तते ।

**८. कारकम् -** आचार्येण पाणिनिनान्वर्थायाः कारकसंज्ञायाः विधानं कर्तुं पृथक् सूत्रं तु न प्रणीतम्, किन्तु साक्षात् 'कारके'[18] इति अधिकारसूत्रे कारकशब्दस्य

---

[12] अष्टा.१.४.१३
[13] जैनेन्द्र.१.२.१०२
[14] अष्टा.१.४.१४
[15] जैनेन्द्र.१.२.१०३
[16] अष्टा.१.४.१८
[17] जैनेन्द्र.१.२.१०७
[18] अष्टा. १.४.२३

प्रयोगोऽक्रियत । क्रियानिर्वर्तकत्वं कारकत्वम् इत्यर्थः तस्मिन् शास्त्रे उच्यते। आचार्येण देवनन्दिनापि कारकसंज्ञायाः एव प्रयोगः स्वशास्त्रे कृतो दृश्यते । तेनापि पृथक्संज्ञासूत्रप्रणयनमकृत्वा 'कारके'[19] इति अधिकारसूत्रे एव तत्संज्ञायाः प्रयोगः कृतो दृश्यते। तत्सूत्रे वृत्तौ लिख्यते - 'कारकं निर्वर्तकं हेतुर्वा। कस्य क्रियायाः? इति।'

९. **अपादानम्** - आचार्यपाणिनिना 'ध्रुवमपायेपादानम्'[20] 'भीत्रार्थानां भयहेतुः'[21] 'पराजेरसोढः'[22] 'वारणार्थाणामीप्सितः'[23] 'अन्तर्धौ येनादर्शनमिच्छति'[24] 'आख्यातोपयोगे'[25] 'जनिकर्तुः प्रकृतिः'[26] 'भुवः प्रभवः'[27] इति अष्टभिः सूत्रैः अपादानसंज्ञायाः विधानम् अष्टाध्याय्यां क्रियते । आचार्यदेवनन्दिना अपादानसंज्ञाविधायकानाम् अष्टानां सूत्राणां स्थाने एकमेव सूत्रं विरचय्य सर्वेषाम् अपादानसंज्ञाविधयाकानां सूत्रार्थस्य सन्निवेशः तस्मिन् सूत्रे कृतः वर्तते। 'ध्यपाये ध्रुवमपादानम्'[28] इति सूत्रेण अपादानसंज्ञाविधानं जैनेन्द्रे कृतं वर्तते । यद्यपि पाणिनीया अपादानसंज्ञैव तैः स्वीकृता तथापि सूत्रेणैकेनैव अपादानसंज्ञासारः सुचारु प्रतिपादितः वर्तते। महाभाष्यदिशा धीप्राप्तिपूर्वको विभागः ध्यपायः तस्मिन् साध्ये यद् ध्रुवं तदपादानसंज्ञं भवतीत्यर्थं स्वीकृत्य महल्लाघवं संपादितं वर्तते जैनेन्द्राचार्यैः।

---

[19] जैनेन्द्र.१.२.१०९

[20] अष्टा.१.४.२४

[21] अष्टा.१.४.२५

[22] अष्टा.१.४.२६

[23] अष्टा.१.४.२७

[24] अष्टा.१.४.२८

[25] अष्टा.१.४.२९

[26] अष्टा.१.४.३०

[27] अष्टा.१.४.३१

[28] जैनेन्द्र.१.२.११०

**१०. संप्रदानम्** - अष्टाध्याय्यां भगवता पाणिनिना सम्यक् प्रदीयते अस्मै इत्यस्मिन् अर्थे 'कर्मणा यमभिप्रैति स् संप्रदानम्'[29] 'रुचर्थ्यानां प्रीयमाणः'[30] 'श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः'[31] 'धारेरुत्तमर्णः'[32] 'स्पृहेरीप्सितः'[33] 'कृधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः'[34] 'राधीक्ष्योर्यस्य विप्रश्नः'[35] 'प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता'[36] 'अनुप्रतिगृणश्च'[37] इति एतैः सूत्रैः संप्रदानमिति संज्ञा विधीयते । एतत्संज्ञायाः एव अनुसरणम् आचार्यदेवनन्दिना स्वीये व्याकरणे कृतं दृश्यते । तैः 'कर्मणोपेयः संप्रदानम्'[38] इति सूत्रं विरचय्य अस्मिन्नेव सूत्रे अन्येषां प्रायः अष्टानां पाणिनीयसूत्राणाम् अर्थस्य समावेशं कृत्वा महल्लाघवं साधितं दृश्यते । 'धारेरुत्तमर्णः[39]' इति पाणिनीयसूत्रस्यापि स्वीकारं कृत्वा तैः एतत्सूत्रद्वारा संप्रदानसंज्ञा साधिता वर्तते ।

**११. करणम्** - आचार्येण पाणिनिना 'साधकतमं करणम्'[40] इति सूत्रेण क्रियासिद्धौ यत् प्रकृष्टोपकारकं कारकं तस्य करणसंज्ञा विधीयते । किञ्च 'दिवः कर्म[41] च' 'परिक्रयणे संप्रदानमन्यतरस्याम्'[42] इति सूत्रद्वयेनापि करणसंज्ञाविधानं

---

[29] अष्टा.१.४.३२
[30] अष्टा.१.४.३३
[31] अष्टा.१.४.३४
[32] अष्टा.१.४.३५
[33] अष्टा.१.४.३६
[34] अष्टा.१.४.३७
[35] अष्टा.१.४.३९
[36] अष्टा.१.४.४०
[37] अष्टा.१.४.४१
[38] जैनेन्द्र.१.२.१११
[39] जैनेन्द्र.१.२.११२
[40] अष्टा.१.४.४२
[41] अष्टा.१.४.४३

क्रियते पाणिनीये । आचार्यदेवनन्दिनापि 'साधकतमं करणम्'[43] इत्येव सूत्रं विरचय्य करणम् इत्येव संज्ञायाः विधानं कृतं दृश्यते ।

**१२. अधिकरणम्** - अष्टाध्याय्याम् 'आधारोऽधिकरणम्'[44] इति सूत्रेण कर्त्तृकर्मद्वारा तन्निष्ठक्रियायाः आधारस्य अधिकरणसंज्ञा विधीयते । तत्र अधिकरणम् इति नपुंसकलिङ्गयुता संज्ञा उच्यते । जैनेन्द्रव्याकरणे 'आधारोऽधिकरणः'[45] इति सूत्रेण पूर्वोक्ते एवार्थे अधिकरण: इति पुंस्त्वविशिष्टः शब्दः संज्ञात्वेन निपात्यते ।

**१३. कर्म** - अष्टाध्याय्यां पाणिनिना कर्मसंज्ञाविधायकानि अष्टौ सूत्राणि व्यरच्यन्त । 'अधिशीङ्स्थासां कर्म'[46] 'अभिनिविशश्च'[47] 'उपान्वध्याङ्वसः'[48] 'कर्तृरीप्सिततमं कर्म'[49] 'तथायुक्तं चानीप्सितम्'[50] 'अकथितं च'[51] 'गति-बुद्धि-प्रत्यवसानार्थ शब्दकर्माकर्मकाणामणि कर्ता स णौ'[52] 'हृक्रो रन्यतरस्याम्'[53] इत्यैतैः सूत्रैः कर्मसंज्ञाविधानं क्रियते । आचार्येण देवनन्दिना पाणिनीयकर्मसंज्ञायाः अनुसरणं कृत्वा अष्टभिरेव सूत्रैः कर्मसंज्ञाविधानं कृतं वर्तते । 'कर्मैवाधिशीङ्स्थासः'[54] 'वसोनूपाध्याङ:'[55] 'अभिनिविशश्च'[56] 'कर्त्राप्यम्'[57]

---

42 अष्टा.१.४.४४
43 जैनेन्द्र.१.२.११४
44 अष्टा.१.४.४५
45 जैनेन्द्र.१.४.४६
46 अष्टा.१.४.४६
47 अष्टा.१.४.४७
48 अष्टा.१.४.४८
49 अष्टा.१.४.४९
50 अष्टा.१.४.५०
51 अष्टा.१.४.५१
52 अष्टा.१.४.५२
53 अष्टा.१.४.५३
54 जैनेन्द्र.१.२.११७

'अकथितञ्च'[58] 'ज्ञागम्यद्यर्थधेरणि कर्ता णौ'[59] 'शब्दे च'[60] 'हृक्रोर्न वा'[61] इत्यैतैः सूत्रैः जैनेन्द्रव्याकरणे कर्मसंज्ञाविधानं कृतं दृश्यते। अत्र केवलं 'तथायुक्तं चानीप्सितम्'[62] इति सूत्रस्य पृथक्सूत्रत्वेन अस्वीकारं कृत्वा कर्मणः प्रकारेषु एव तस्यान्तर्भावं कृत्वा लाघवम् साधितं दृश्यते जैनेन्द्राचार्यैः।

**१४. कर्ता** - आचार्यपाणिनिना 'स्वतन्त्रः कर्ता'[63] इति सूत्रेण क्रियायां स्वातन्त्र्येण विवक्षितस्य अर्थस्य कर्ता इति संज्ञा विधीयते। आचार्यदेवनन्दिनापि 'स्वतन्त्रः कर्ता'[64] इति सूत्रं विरचय्य एतदर्थस्य कर्ता इत्येव संज्ञा विहिता वर्तते।

**१५. हेतुः** - अष्टाध्याय्यां कर्तुः प्रयोजकस्य हेतुसंज्ञां विधातुं भगवता पाणिनिना 'तत्प्रयोजको हेतुश्च'[65] इति सूत्रं व्यरच्यत। आचार्यदेवनन्दिनापि एतस्याः एव हेतुसंज्ञायाः प्रयोगः स्वीये शास्त्रे कृतः इति अवलोक्यते। तेन 'तद्योजको हेतुः'[66] इति सूत्रं प्रणीय स्वतन्त्रस्य कर्तुः योजकस्य हेतुसंज्ञा विधीयते।

---

55 जैनेन्द्र.१.२.११८
56 जैनेन्द्र.१.२.११९
57 जैनेन्द्र.१.२.१२०
58 जैनेन्द्र.१.२.१२१
59 जैनेन्द्र.१.२.१२२
60 जैनेन्द्र.१.२.१२३
61 जैनेन्द्र.१.२.१२४
62 अष्टा.१.४.५०
63 अष्टा.१.४.५४
64 जैनेन्द्र.१.२.१२४
65 अष्टा.१.४.५५
66 जैनेन्द्र.१.२.१२६

**१६. निपातः** - आचार्यपाणिनिना 'प्राग्रीश्वरान्निपाताः'[67] 'चादयोसत्त्वे'[68] 'प्रादयः'[69] इति सूत्रैः निपातसंज्ञायाः विधानं कृतं वर्तते। निपातसंज्ञायाः स्थाने जैनेन्द्रव्याकरणे 'निः'[70] इति सूत्रेण निरिति संज्ञा विधीयते।

**१७. उपसर्गः** - आचार्यपाणिनिना 'उपसर्गाः क्रियायोगे'[71] इति सूत्रेण प्रादीनां क्रियायोगे उपसर्गसंज्ञा विहितास्ति। उपसर्गसंज्ञायाः स्थाने आचार्यदेवनन्दिना 'क्रियायोगे गि:[72]' इति सूत्रं प्रणीय क्रियायोगे प्रादीनां गिः संज्ञा विहितास्ति या च लघ्वी।

**१८. गतिः** - अष्टाध्याय्यां पाणिनिना 'गतिश्च'[73] 'ऊर्यादिच्विडाचश्च'[74] 'अनुकरणं चानितिपरम्[75]' 'आदरानादरयोः सदसती[76]' 'भूषणेलम्[77]' 'अन्तरपरिग्रहे[78]' 'कणेमनसी श्रद्धाप्रतीघाते[79]' 'पुरोव्ययम्[80]' 'अस्तं च[81]' 'अच्छ गत्यर्थवदेषु[82]'

---

67 अष्टा.१.४.५६

68 अष्टा.१.४.५७

69 अष्टा.१.४.५८

70 जैनेन्द्र.१.२.२२

71 अष्टा.१.४.५९

72 जैनेन्द्र.१.२.१३०

73 अष्टा. १.४.६०

74 अष्टा. १.४.६१

75 अष्टा. १.४.६२

76 अष्टा. १.४.६३

77 अष्टा. १.४.६४

78 अष्टा. १.४.६५

79 अष्टा. १.४.६६

80 अष्टा. १.४.६७

81 अष्टा. १.४.६८

82 अष्टा. १.४.६९

'अदोनुपदेशे[83]' 'तिरोन्तर्धौ[84]' 'विभाषा कृञि[85]' 'उपाजेन्वाजे[86]' 'साक्षात्प्रभृतीनि च[87]' 'अनत्याधान उरसिमनसी[88]' 'मध्ये पदे निवचने च[89]' 'नित्यं हस्ते पाणावुपयमने[90]' 'प्राध्वं बन्धने[91]' 'जीविकोपनिषदावौपम्ये[92]' इति विंशत्या सूत्रैः गतिसंज्ञायाः विधानं कृतं दृश्यते। गतिसंज्ञायाः स्थाने आचार्येण देवनन्दिना जैनेन्द्रे व्याकरणे तिसंज्ञायाः विधानं कृतं वर्तते । 'ति'[93] 'च्विडाजूर्यादिः'[94] 'अनितावनुकरणम्'[95] 'सदादरानादरयोः'[96] 'भूषापरिग्रहेलमन्तः'[97] 'कणेमनः श्रद्धाघाते'[98] 'पुरोस्तं झिः'[99] 'गत्यर्थवदेच्छः'[100] 'अनुपदेशेदः'[101] 'तिरोन्तर्धौ'

---

[83] अष्टा. १.४.७०
[84] अष्टा. १.४.७१
[85] अष्टा. १.४.७२
[86] अष्टा. १.४.७३
[87] अष्टा. १.४.७४
[88] अष्टा. १.४.७५
[89] अष्टा. १.४.७६
[90] अष्टा. १.४.७७
[91] अष्टा. १.४.७८
[92] अष्टा. १.४.७९
[93] जैनेन्द्र.१.२.१३१
[94] जैनेन्द्र.१.२.१३२
[95] जैनेन्द्र.१.२.१३३
[96] जैनेन्द्र.१.२.१३४
[97] जैनेन्द्र.१.२.१३५
[98] जैनेन्द्र.१.२.१३६
[99] जैनेन्द्र.१.२.१३७
[100] जैनेन्द्र.१.२.१३८
[101] जैनेन्द्र.१.२.१३९

[102]'वा कृत्रि'[103] 'उपाजेन्वाजे'[104] 'साक्षादादिः'[105] 'मनस्युरस्यनत्याधाने'[106] 'मध्ये पदे निवचने'[107] 'हस्ते पाणौ स्वीकृतौ तिः'[108] 'प्राध्वं बन्धने'[109] 'जीविकोनिषदाविवे'[110] इत्येतैः अष्टादशभिः सूत्रैः तिसंज्ञायाः विधानं कृतं वर्तते। तिसंज्ञा गतिसंज्ञायाः अपेक्षया लघ्वी वर्तते।

**१९. परस्मैपदम्** - आचार्यपाणिनिना अष्टादशलादेशानां 'लः परस्मैपदम्'[111] इति सूत्रेण परस्मैपदसंज्ञा विहिता वर्तते। संज्ञा चेयमन्वर्था। परस्मै परोद्देशार्थफलकं पदम् परस्मैपदमित्यर्थः। एतत्संज्ञायाः स्थाने आचार्यदेवनन्दिना 'लो मम्'[112] इति सूत्रेण मसंज्ञा विहिता वर्तते। संज्ञा चेयम् पाणिनीयसंज्ञापेक्षया लघ्वी।

**२०. आत्मनेपदम्** - पाणिनीये 'तङानावात्मनेपदम्'[113] इति सूत्रेण तङप्रत्याहारगतानां नवप्रत्ययानां (त-आताम्-झ-थास्-आथाम्-ध्वम्-इट्-वहि-महिङ्) शानच्कानचोश्चात्मनेपदसंज्ञा विधीयते। पाणिनीयात्मनेपदसंज्ञान्वर्था वर्तते। आत्मने आत्मार्थफलबोधनाय पदमित्यात्मनेपदमित्यर्थस्तस्याः। आत्मनेपदसंज्ञायाः स्थाने जैनेन्द्रेव्याकरणे 'इङानं दः'[114] इति सूत्रेण द इति

---

[102] जैनेन्द्र.१.२.१४०
[103] जैनेन्द्र.१.२.१४१
[104] जैनेन्द्र.१.२.१४२
[105] जैनेन्द्र.१.२.१४३
[106] जैनेन्द्र.१.२.१४४
[107] जैनेन्द्र.१.२.१४५
[108] जैनेन्द्र.१.२.१४६
[109] जैनेन्द्र.१.२.१४७
[110] जैनेन्द्र.१.२.१४८
[111] अष्टा.१.४.९९
[112] जैनेन्द्र.१.२.१५०
[113] अष्टा.१.४.१००
[114] जैनेन्द्र.१.२.१५१

संज्ञाविधानं क्रियते । इङप्रत्याहारगतानां नवप्रत्ययानां (इट्-वहि-महिङ्- थास्-आथाम्-ध्वम्-त-आताम्-झङ्) शानः च आत्मनेपदसंज्ञा विधीयते । जैनेन्द्रे संज्ञालाघवे सत्यपि व्याख्यानापेक्षा तु वर्तते।

**२१. उत्तमपुरुषः २२. प्रथमपुरुषः २३. मध्यमपुरुषः** - अष्टाध्याय्यां 'तिङ्स्त्रीणि त्रीणि प्रथमोध्यमोत्तमाः[115]' इति सूत्रेण तिङः प्रथमस्य त्रिकस्य (तिप् तस् झि, त आताम् झ) इत्येतस्य प्रथम: इति संज्ञा उच्यते। अस्मिन् अर्थे जैनेन्द्र व्याकरणे 'मिङस्त्रिशोऽअस्मद्युष्मदन्याः'[116] इति सूत्रेण अन्य इति संज्ञायाः विधानं क्रियते । अत्र विशेषो नाम पाणिनीयेन सूत्रेण प्रथम:, मध्यमः, उत्तमः इत्यनेन क्रमेण तिङ: प्रत्येकं त्रिकस्य संज्ञाविधानं कृतं वर्तते । जैनेन्द्रव्याकरणे तु एतद्विपरीतक्रमेण प्रत्ययानां संज्ञाविधानं कृतं वर्तते। पाणिनीये शास्त्रे ये प्रत्ययाः (मिप्-वस्-मस् तथा इट्-वहि-महि) उत्तमपुरुषसंज्ञकाः भवन्ति तेषां अस्मद् इति संज्ञाविधानम् कृत्वा तेषां क्रमः जैनेन्द्रसूत्रे पूर्वं स्थापितः। पाणिनीये शास्त्रे ये प्रत्ययाः (सिप्-थस्-थ तथा थास्-आथाम्-ध्वम्) मध्यमपुरुषसंज्ञकत्वेन उक्ताः तेषां युष्मद् इति नामकरणं कृत्वा तेषां क्रमः जैनेन्द्रसूत्रे मध्ये स्थापितः। तथा पाणिनीये शास्त्रे ये प्रत्ययाः (तिप्-तस्-झि, तथा त-आताम्-झ) प्रथमपुरुषसंज्ञकत्वेन उक्ताः तेषाम् अन्य इति नामकरणं कृत्वा तेषां क्रमः अन्ते स्थापितः अस्ति । पाणिनीयसूत्रैः आदौ एतेषां तिबादीनां प्रत्ययानां प्रथमादिसंज्ञाविधानं कृत्वा ततः तेषां प्रयोगः कस्मिन् अर्थे करणीयः इत्युक्तं वर्तते । यथा 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः'[117] इति सूत्रेण मध्यमपुरुषसंज्ञावतां प्रत्ययानां प्रयोगः, 'अस्मद्युत्तमः'[118] इति सूत्रेण अस्मद् इति उपपदे उत्तमपुरुषसंज्ञावतां

---

115 अष्टा.१.४.१०१

116 जैनेन्द्र.१.२.१५२

117 अष्टा.१.४.१०५

118 अष्टा.१.४.१०७

प्रत्ययानां प्रयोगः करणीयः इत्युक्तं वर्तते तथा 'शेषे प्रथमः'[119] इति सूत्रेण शेषे अर्थे प्रथमपुरुषसंज्ञावतां प्रत्ययानां प्रयोगः करणीयः इत्युक्तं वर्तते।

एतेषां सूत्राणां सारं गृहीत्वा जैनेन्द्रव्याकरणे तिबादीनां प्रत्ययानां प्रत्येकं त्रिकस्य संज्ञाकरणवेलायामेव 'अस्मद् युष्मद् अन्य' इति एताः तदर्थप्रातिपादिकसंज्ञा: उक्ताः सन्ति। एताभिः संज्ञाभिः महत् लाघवम् साधितं वर्तते इति तु स्फुटमेव।

**२४. एकवचनम् २५. द्विवचनम् २६. बहुवचनम्** - पाणिनीये 'तान्येकवचन-द्विवचन-बहुवचनान्येकशः'[120] इति सूत्रेण तिङां सुपां च त्रिकाणामेकशः एकवचनम्, द्विवचनम्, बहुवचनम् चेति संज्ञाः विधीयन्ते । आचार्यदेवनन्दिना 'एकद्विबहवश्चैकशः'[121] इति सूत्रेण तिङां सुपां च त्रिकाणामेकशः एकः द्विः बहुः च इति संज्ञाः विहिताः। तेन इतोऽपि लाघवम् साधितं वर्तते।

**२७. विभक्तिः** - अष्टाध्याय्यां 'विभक्तिश्च'[122] इति सूत्रेण सुपां तिङां च विभक्तिसंज्ञा विधीयते । 'प्राग्दिशो विभक्तिः'[123] इत्यनेन सूत्रेणापि एतदधिकारे पठितानां तसिलादीनां प्रत्ययानां विभक्तिरीति संज्ञा विधीयते । जैनेन्द्रव्याकरणे विभक्तिः इति संज्ञायाः स्थाने विभक्ती इति संज्ञाविधानं कृतं वर्तते। जैनेन्द्रे प्रायः एतादृश्यः महत्य: संज्ञाः न दृश्यन्ते। किन्तु अत्र उच्यते यत् एतत् महासंज्ञाकरणम् उत्तरार्थम् इति । 'तासामाप्परास्तद्धलचः'[124] इति उत्तरसूत्रे विभक्ती इति महासंज्ञायाः प्रयोजनम् उच्यते यत् विभक्तीशब्दस्थाः हलः अचः च आकारपकारपराः तासां विभक्तीनां यथासंख्यं संज्ञाः भवन्तीति । प्रथमादीनां विभक्तीनां क्रमशः वा इप् भा अप् का ता ईप् इत्येताः संज्ञाः। यद्यपि विभक्ती इति

---

[119] अष्टा.१.४.१०८

[120] अष्टा.१.४.१०२

[121] जैनेन्द्र.१.२.१५५

[122] अष्टा.१.४.१०४

[123] अष्टा.५.३.१

[124] जैनेन्द्र.१.२.१५९

महासंज्ञा तथापि एतत्संज्ञायाः आधारेण अन्यसंज्ञानां प्रणयनं कृत्वा महत्तमं लाघवं साधितं दृश्यते जैनेन्द्राचार्यैः ।

प्रथमा - वा । सु औ जस् इति वा ।

द्वितीया - इप् । अम् औट् शस् इति इप् ।

तृतीया - भा । टा भ्याम् भिस् भा ।

चतुर्थी - अप् । ङे भ्याम् भ्यस् अप् ।

पञ्चमी - का । ङसि भ्याम् भ्यस् का ।

षष्ठी - ता । ङस् ओस् आम् ता ।

सप्तमी - ईप् । ङि ओस् सुप् इति ईप् ।

**२८. संहिता** - आचार्येण पाणिनिना वर्णानाम् अतिशयितस्य संनिकर्षस्य 'परः संनिकर्षः संहिता'[125] इति सूत्रेण संहिता संज्ञा विधीयते । संहिता इति संज्ञायाः स्थाने आचार्येण देवनन्दिना सन्धिरिति लघीयसी संज्ञा प्रयुक्ता दृश्यते । संधिसंज्ञायाः विधानार्थं तेन पृथक् सूत्रं तु न प्रणीतम् किन्तु 'सन्धौ'[126] इति अधिकारसूत्रे एव साक्षात् तस्या: प्रयोगः कृतः । तत्सूत्रे वृत्तौ लिख्यते - 'लोकतः एव संश्लेषः सन्निकर्षो वा संधिरिति ज्ञातव्यमिति । सन्धिरिति लोकप्रसिद्धायाः संज्ञायाः स्वीकृतत्वात् तेन नूतनसंज्ञासूत्रारम्भः न कृतः ।

**२९. अवसानम्** - अष्टाध्याय्यां वर्णानाम् अभावस्य 'विरामोऽवसानम्'[127] इति सूत्रेण अवसानसंज्ञा विधीयते । अवसानसंज्ञायाः स्थाने आचार्यदेवनन्दिना विरामसंज्ञायाः प्रयोगः कृतो दृश्यते । किन्तु, विरामसंज्ञां विधातुं तेन न किमपि पृथक् सूत्रं प्रणीतम् । 'विरामे विसर्जनीयः'[128] इति सूत्रे विरामेति संज्ञा प्रयुक्ता दृश्यते । तत्सूत्रे वृत्तौ लिख्यते -'विरतिः वर्णस्य अनुच्चारणं विरामः' इति । तन्नाम

---

125 अष्टा. १.४.१०९

126 जैनेन्द्र.४.३.६०

127 अष्टा.१.४.११०

128 जैनेन्द्र.५.४.१९

लोकप्रसिद्धस्य विरामेति अर्थस्य ग्रहणमिह शास्त्रे कृत्वा जैनेन्द्राचार्यैः लाघवं सम्पादितं दृश्यते।

**उपसंहारः -**

पाणिनीयानां संज्ञानां जैनेन्द्रव्याकरणस्थं स्वरूपं दृष्ट्वा साम्यवैषम्ययोः चिन्तनं कृत्वा उपसंहाररूपेण एवं वक्तुं शक्यते।

व्याकरणशास्त्रस्य प्रयोजनेषु लघ्विति प्रयोजनं वर्तते। व्याकरणशास्त्रस्य लघुनोपायेन अवगमनाय बहुत्र प्रयासः कृतः दृश्यते । अत एव उच्यते 'अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः' इति। शास्त्रे लाघवम् द्विविधं भवति - शब्दकृतम् अर्थकृतं च। बहुत्र पाणिनीयव्याकरणे याः संज्ञाः उच्यन्ते तत्र यद्यपि टि घु भ इत्यादयः लघ्व्यः अपि काश्चन संज्ञाः सन्ति, तथापि महत्यः संज्ञाः अपि दृश्यन्ते संख्या उपसर्जनमित्यादयः। तत्र भगवता भाष्यकृतोच्यते - 'संख्या इति महती संज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः। कुत एतत् ? लघ्वर्थं हि संज्ञाकरणम्। तत्र महत्याः संज्ञायाः करणे एतत् प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत। संख्यायते अनया इति संख्या।'[129] पाणिनीये शास्त्रे एवम्प्रकारेण हेतुपुरस्सरं महत्संज्ञाकरणम् कृतं दृश्यते। येन शास्त्रे सरलतया अवगमः स्यात्। किन्तु जैनेन्द्रे कांश्चन अपवादान् विहाय सर्वत्र लघुसंज्ञाकरणमेव कृतं दृश्यते।

- **जैनेन्द्रे लोकप्रसिद्धस्यार्थस्य ग्रहणात्क्वचित्तत्संज्ञानां संज्ञासूत्रत्वेनानुल्लेखः** -

आचार्येण देवनन्दिना क्वचित् लोकप्रसिद्धायाः संज्ञायाः ग्रहणं कृत्वा तत्संज्ञाविधानार्थं पुनः शास्त्रे नूतनसूत्रारम्भः न कृतः वर्तते। यथा सन्धिः, विरामः, इत्यादयः संज्ञाः साक्षात् तेन विधिप्रदेशेषु प्रयुक्ताः। यथा 'विरामे विसर्जनीयः' इति विधिप्रदेशे एव साक्षात् विरामसंज्ञोल्लेखो दृश्यते। किन्तु विरामसंज्ञाविधायकं सूत्रं तैर्न प्रणीतम्।

[129] महा.२.२.३०

- **पाणिनीयसंज्ञानां स्थाने लघीयसीनां संज्ञानां प्रयोगः -**

पाणिनीये शास्त्रे अङ्गम्, निपातः, आत्मनेपदम्, परस्मैपदम् इत्यादयः बहव्यः संज्ञाः प्रदीर्घाः सन्ति । अन्वर्थसंज्ञाकारणतः तच्छास्त्रे तासामलघुकरणम् । किन्तु जैनेन्द्रे व्याकरणे लघीयसीनां संज्ञानां सर्वथाग्रहकारणतः प्रदीर्घानां पाणिनीयसंज्ञानां स्थाने लघ्व्यः संज्ञाः प्रणीताः । यथा अङ्गसंज्ञायाः स्थाने गुसंज्ञा, निपातसंज्ञायाः स्थाने निसंज्ञा, परस्मैपदसंज्ञायाः स्थाने मसंज्ञा, आत्मनेपदसंज्ञायाः स्थाने द इति संज्ञा ।

- **जैनेन्द्रे कासाञ्चन पाणिनीयसंज्ञानां यथावत् स्वीकारः -**

आचार्यदेवनन्दिना सर्वासां पाणिनीयसंज्ञानां स्थाने परिवर्तनं कृत्वा स्वीयाः संज्ञाः न प्रतिपादिताः। कासाञ्चन पाणिनीयसंज्ञानां यथावत्स्वीकारोपि स्वीये ग्रन्थे कृतो दृश्यते । यथा भ, पदम्, कारकम्, कर्ता, कर्म, करणम्, संप्रदानम्, अपादानम्, अधिकरणम्, हेतुः इत्येताः संज्ञाः महतादरेण जैनेन्द्रे स्वीकृताः अवलोक्यन्ते ।

- **शब्दकृतलाघवपक्षपातिनः जैनेन्द्राचार्याः -**

जैनेन्द्राचार्यैः सर्वत्र वर्णकृतलाघवत्वमेव अङ्गीकृतं वर्तते । क्वचिदेव अन्वर्थसंज्ञापक्षोऽपि आश्रीयते । किन्तु तत्रापि तैः वर्णकृतलाघवं तु न त्यज्यत एव । यथा अवसानसंज्ञायाः स्थाने विरामः, संहितासंज्ञायाः स्थाने सन्धिः इति ।

- **वर्णकृतलाघवस्यापेक्षयार्थकृतलाघवस्य प्राधान्यात् पाणिनीयानां संज्ञानां लाघवमेव -**

आचार्येण देवनन्दिना लघुसंज्ञाकरणम् कृत्वा महल्लाघवं साधितं वर्तते इत्यत्र नास्ति मनागपि संशयः । किन्तु शब्दकृतलाघवस्य अपेक्षया अर्थकृतं हि लाघवं महत्त्वपूर्णं भवति । पाणिनिना महत्य: संज्ञाः यद्यपि कृताः, किन्तु तत्र अन्वर्थता वर्तते । अतः अर्थकृतं लाघवं वर्तत एव । आचार्यदेवनन्दिना सर्वत्र संज्ञाकरणसमये शब्दकृतलाघवस्यैव पक्षः आश्रितः वर्तते । अतः सर्वत्र

व्याख्यानापेक्षत्वात्तत्पक्षे महद्गौरवं क्लिष्टत्वं च वर्तते । अतः यद्यपि पाणिनीयस्यापेक्षया जैनेन्द्रं व्याकरणम् अर्वाचीनम् पाणिनीयाधारितं च तथापि पाणिनीयव्याकरणस्य तुलनया तत् प्रसिद्धं नाभवत् । लोकविज्ञातानामन्वर्थकानां च संज्ञानां स्वीकरणेन पाणिनीयं व्याकरणम् अर्थकृतलाघवेन संपन्नं सत्प्रसिद्धमभूत् ।

**संदर्भग्रन्थाः** -


१. त्रिपाठी), अ. (. (१९५६). *जैनेन्द्रव्याकरणम् महावृत्तिसहितम्* . काशी : भारतीय ज्ञानपीठ .

२. त्रिपाठी, प. (२००१). *वाक्यपदीयम् भर्तृहरिकृतम्* . दिल्ली : चौखंबा संस्कृत प्रतिष्ठानम् .

३. दीक्षितपुष्पाकृत:. (२०१०). *अष्टाध्यायी सूत्रपाठः* . नवदेहली : संस्कृतभारती.

४. मीमांसक, य. (१९९४). *संस्कृतव्याकरणशास्त्र का इतिहास प्रथम भाग* . दिल्ली : रामलाल कपूर प्रेस.

५. वेदालङ्कार, भ. (२००६). *पातञ्जल महाभाष्यम् विद्यानिधि हिन्दीव्याख्यासहितम्* . कुरुक्षेत्रम् : विद्यानिधि शोधसंस्थानम् .

६. श्रीगोविन्दाचार्य. (२०१९). *वैयाकरणसिद्धान्तकौमुदी भट्टोजिदीक्षितकृता* . दिल्ली: चौखम्बा सुरभारती प्रकाशन .